# मूलरामायणम्



तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ।। 1.1.1 ।।

पदच्छेदः - तपःस्वाध्याय-निरतं, तपस्वी, वाग्विदां, वरम्, नारदं, परिपप्रच्छ वाल्मीकिः मुनि-पुङ्गवम्

पदपरिचयः –

तपःस्वाध्याय-निरतं,= तपसि स्वाध्याये च आसक्तम्

तपस्वी = तापसी

वाग्विदां = वाक्पटूनां

वरम् = श्रेष्ठम्

नारदं = नारदनामकं महर्षिम्

पदपरिचयः –

परिपप्रच्छ = आदरेण पृष्टवान्

वाल्मीकिः = वाल्मीकि-नामकः मुनिः

मुनि-पुङ्गवम् = ऋषिषु श्रेष्ठम्

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ।। 1.1.1 ।।

"तप्" = सन्तापने

तपः = तप्यते भवबन्ध-नाशाय इति

तपश्च स्वाध्यायश्च तपःस्वाध्यायौ (द्वन्द्वः)

तपःस्वाध्याययोः निरतः तम् तपःस्वाध्यायनिरतं

तपः अस्य अस्ति इति तपस्वी

वाचं विदन्ति इति = वाग्विदः तेषाम् = वाग्विदां

"वर"-ईप्सायाम् = वरम्

नृणाति इति नरः (नृ+अच्)

नरस्य इदम् = नारम् (धर्मः)

नारं ददाति इति नारदः तम् = नारदम्

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ।। 1.1.1 ।।

वल्मीके भवः / वल्मीकस्य अपत्यं पुमान् वा वाल्मीकिः

मुनिपुङ्गवः = "मन्" मनुते इति मुनिः, मौनव्रती मुनिः भवति ।

मुनिषु पुङ्गवः तम् = मुनिपुङ्गवम्

पुमान् गौः = पुङ्गवः (वृषभः)

परिपप्रच्छ = परि+ प्रच्छ (ज्ञीप्सायाम्)
लिट्-लकार-प्र.ए.

अन्वयः
तपस्वी वाल्मीकिः तपःस्वाध्यायनिरतं वाग्विदां वरम् मुनिपुङ्गवं नारदं परिपप्रच्छ

को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ।। 1.1.2 ।।

पदच्छेदः – कः नु अस्मिन् साम्प्रतम् लोके गुणवान् कः च वीर्यवान् धर्मज्ञः च कृतज्ञः च सत्यवाक्यः दृढव्रतः

पदपरिचयः –
नु – (प्रश्नः) अस्मिन् लोके = एतस्मिन् भूलोके
साम्प्रतम् = इदानीम्
कः गुणवान् = कः श्रेष्ठगुण-सम्पन्नः
कः च वीर्यवान् = कः च पराक्रमी

पदपरिचयः –
धर्मज्ञः = वर्णाश्रमस्य धर्मानां ज्ञाता
कृतज्ञः = यः अन्येन कृतम् उपकृतिं जानाति
सत्यवाक्यः = सत्यवचनं यस्य शीलम्
दृढव्रतः = अविचलित-प्रतिज्ञावान्

को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ।। 1.1.2 ।।

"नु" – नु पृच्छायां विकल्पे च (अमरः)

साम्प्रतम् – एतर्हि-सम्प्रति-इदानीम्-अधुना-साम्प्रतं तथा (अमरः)

गुणः अस्य अस्तीति गुणवान्

वीर्यम् अस्य अस्तीति वीर्यवान्

धर्मं जानातीति धर्मज्ञः

कृतं जानातीति कृतज्ञः

सत्यं वाक्यं यस्य सः सत्यवाक्यः

दृढं व्रतं यस्य सः दृढव्रतः

तपः अस्य अस्ति इति तपस्वी

अन्वयः

नु अस्मिन् लोके साम्प्रतं कः गुणवान् ? कः च वीर्यवान् ? धर्मज्ञः कृतज्ञः च सत्यवाक्यः दृढव्रतः च कः? (अस्ति?)

चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।
विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ।। 1.1.3 ।।

पदच्छेदः – चारित्रेण च कः युक्तः सर्वभूतेषु कः हितः
विद्वान् कः कः समर्थः च कः च एक-प्रिय-दर्शनः

पदपरिचयः –
चारित्रेण = सदाचारेण
कः युक्तः = समन्वितः कः
सर्वभूतेषु = सकलजीवेषु
कः हितः = कः कल्याणकारकः
विद्वान् कः = ज्ञानवान् / पण्डितः कः

पदपरिचयः –
कः समर्थः = सर्व-कार्य-क्षमः कः
कः च एक-प्रिय-दर्शनः = सर्वेषां सदा प्रियः कः

चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।
विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ।। 1.1.3 ।।

युजिर् (योगे) + क्त = युक्तः

सर्वाणि च तानि भूतानि, तेषु = सर्वभूतेषु

धा (धारण-पोषणयोः) + क्त = हितः

वेत्ति इति विद्वान् (विद् + शतृ-विद्वस्)

सम्+अर्थ् (उपयाञ्चायाम्)+अच् = समर्थः

एकं प्रियं दर्शनं यस्य सः = एकप्रियदर्शनः

**अन्वयः**

(अस्मिन् लोके) चारित्रेण च कः युक्तः? सर्वभूतेषु च कः हितः? कः विद्वान्? कः समर्थः? एकप्रियदर्शनः च कः ? (अस्ति)

आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः ।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ।। 1.1.4 ।।

पदच्छेदः – आत्मवान् कः जितक्रोधः द्युतिमान् कः अनसूयकः कस्य बिभ्यति देवाः च जातरोषस्य संयुगे

पदपरिचयः –
आत्मवान् कः = धैर्यवान् कः
जितक्रोधः = कोपरहितः कः
द्युतिमान् कः = कान्तिमान् कः
अनसूयकः = परेषु दोषस्य आरोपणं यः न करोति सः

पदपरिचयः –
कस्य = जनस्य
जातरोषस्य = उत्पन्न-क्रोधस्य
देवाः बिभ्यति = अमराः भयम् अनुभवन्ति
संयुगे = युद्धे

## आत्मवान् को जितक्रोधो द्युतिमान् को ऽनसूयकः ।
## कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ।। 1.1.4 ।।

आत्मा अस्य अस्तीति आत्मवान् (येन अन्तःकरणं वशीकृतम्)

जितः क्रोधः येन सः जितक्रोधः

द्युतिः (कान्तिः) अस्य अस्तीति द्युतिमान्

अविद्यमाना असूया यस्य सः अनसूयकः

जातः रोषः यस्य सः, तस्य जातरोषस्य

आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च (अमरः)

असूया तु दोषारोपो गुणेष्वपि इत्यमरः

बिभ्यति = भी (भये) लट्-लकार-प्र.बहु.

अन्वयः
जितक्रोधः आत्मवान् कः ? अनसूयकः द्युतिमान् कः (अस्ति) संयुगे जातरोषस्य कस्य देवाः बिभ्यति

एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।
महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् ।। 1.1.5 ।।

पदच्छेदः – एतत् इच्छामि अहं श्रोतुं परं कौतूहलं हि मे महर्षे त्वं समर्थः असि ज्ञातुम् एवंविधं नरम्

पदपरिचयः –
एतत् = एवं पूर्वम् उक्तप्रकारं गुणसम्पन्नं
अहम् = वाल्मीकिः
श्रोतुम् = आकर्णयितुम्
इच्छामि = वाञ्छामि
हि = यतः
मे = मम (वाल्मीकेः)
परम् = अत्यन्तम्

पदपरिचयः –
कौतूहलम् = उत्साहः (अस्ति)
महर्षे = हे नारद
ज्ञातुम् एवंविधं नरम् = पूर्वोक्त-लक्षण-सम्पन्नं पुरुषं बोद्धुम्
त्वं समर्थः असि = भवान् कुशली अस्ति

एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।
महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् ।। 1.1.5 ।।

महान् ऋषिः महर्षिः (सम्बोदनम्) महर्षे

ऋष् (गतौ) + ङीष् । ऋषति ज्ञानेन संसारपारम् इति ऋषिः (मन्त्रद्रष्टा)

अन्वयः

अहम् एतत् श्रोतुम् इच्छामि हि (यतः) मे परं कौतूहलं (वर्तते) । महर्षे! त्वं एवंविधं नरं ज्ञातुं समर्थः असि ।

श्रुत्वा चैतत् त्रिलोकज्ञो वाल्मीकेर्नारदो वचः ।
श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ।। 1.1.6 ।।

पदच्छेदः – श्रुत्वा च एतत् त्रिलोकज्ञः वाल्मीकेः नारदः वचः श्रूयताम् इति च आमन्त्र्य प्रहृष्टः वाक्यम् अब्रवीत्

पदपरिचयः –
त्रिलोकज्ञः नारदः = त्रिलोकवेत्ता नारदमहर्षिः
एतत् वाल्मीकेः वचः श्रुत्वा = वाल्मीकेः वचनम् आकर्ण्य
"श्रूयताम्" इति = "शृणोतु" इति
आमन्त्र्य = आहूय

पदपरिचयः –
प्रहृष्टः वाक्यम् अब्रवीत् = सन्तुष्टः सन् वचनम् उक्तवान्

श्रुत्वा चैतत् त्रिलोकज्ञो वाल्मीकेर्नारदो वचः ।
श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ।। 1.1.6 ।।

त्रयाणां लोकानां समाहारः = त्रिलोकम्

त्रिलोकं (भूः,भुवः, स्वः) जानातीति त्रिलोकज्ञः

आ+मन्त्र+ल्यप् = आमन्त्र्य

प्र + हृष् + क्त = प्रहृष्टः

अन्वयः

त्रिलोकज्ञः नारदः वालमीकेः एतत् वचः श्रुत्वा "श्रूयताम्" इति आमन्त्र्य प्रहृष्टः (सन्) वाक्यम् अब्रवीत् ।